QQS9EY

## षष्ठः पाठः

# सन्तश्रीगहिरागुरुः



श्रीगहिरागुरुः महान् समाजसुधारकः दार्शनिकः तपस्वी च आसीत्। तस्य जन्म पञ्चाधिकएकोनविंशतिशततमे (1905) खीस्ताब्दे रायगढ़मण्डलान्तर्गते गहिराग्रामेऽभवत्। तत्रभवतः पिता श्री बुडकीकँवरमहोदयः सम्पन्नो कृषकः जनजातीयसमूहस्य ग्रामप्रमुखः च आसीत्। मातुर्नाम् श्रीमती सुमित्रा देवी आसीत्। गहिरागुरोः वास्तविकं नाम श्री रामेश्वरकँवरः आसीत्। अन्येषां बालकानां सदृशः तस्य बाल्यकालः प्रकृत्याः सान्निध्ये व्यतीतः।

किशोरावस्थायां रामेश्वरकँवरः गंभीरप्रवृत्तिं प्राप्तवान्। जनजातीयसमूहस्य दुरवस्थां विलोक्य सः भृशं दुःखी आसीत्। तत्रभवान् तान् आत्मनिर्भरकरणार्थं भगीरथप्रयत्नं कृतवान्। एकदा रामेश्वरकँवरः टीपाझरननाम्नि स्थाने अष्टदिनात्मकं अहर्निशं साधनामकरोत्। सः जनान् उपदिशति स्म। गहिराग्रामे सः शिवमन्दिरस्य निर्माणमपि कारयितवान्। मन्दिरस्य प्राङ्गणे च प्रतिदिनं कीर्तनं करोति स्म। सः रात्रौ भगवद्चिन्तनं कुर्वन् वने इतस्ततश्च भ्रमति स्म। यदा कदा सः समाधिमपि अधिगच्छति स्म। शनैः शनैः तस्य सम्बोधनं गहिरागुरुः अभवत्। सः जनजातीयसमूहस्य नेतृत्वम् अकरोत्। स्वभावतः जनेषु लोकप्रियः अभवत्।

गृहस्थजीवनं व्यतीतं कुर्वन् गहिरागुरुः लोककल्याणे अनवरतं संलग्नः जातः। अनेकेषु स्थानेषु तेन शिक्षासंस्थानानि संस्थापितानि। तेषु संस्कृतपाठशालाः, आश्रमविद्यालयाः महाविद्यालयाःच सन्ति। जीवने शिक्षायाः महत्त्वं निर्विवादम्। तस्मात् कारणात् कालान्तरे सः वंचितसमुदायस्य छात्रेभ्यः अनेकान् छात्रावासान् चापि प्रारभयामास। बहवः जनाः संस्थाश्च तस्य कल्याणकारीकार्यक्रमेषु सहयोगं दत्तवन्तः। तदनन्तरं शासकीयानुदानेन तानि शिक्षासंस्थानानि गतिं प्राप्तानि।

निजसमुदायस्य विकासाय त्रिचत्वारिंशतधिकैकोनविंशतिशततमे (1943) खीष्ताब्दे सः गहिराग्रामे सनातनसन्तसमाजनाम संस्थां स्थापयत्। सः वाञ्छति स्म यत् जनाः वैयक्तिकं महत्त्वं विहाय संगठने योजयेयुः।

गुरुमहोदयस्य शिक्षायाः सारः अस्ति – सत्यं, शान्तिः, दया क्षमा च। ततः सः सात्विकजीवनयापनाय उपदेशं दत्तवान्। जनान् स्वच्छतायाः महत्त्वम् अबोधयत्। तस्य व्यक्तित्वे ईदृशं आकर्षणमासीत् यत् जनाः सहजैव प्रभाविताः संजाताः। उत्तरोत्तरं अनुयायीनाम् अभिवर्धनम् अभवत्। गहिरागुरोः ते अनुयायिनः ग्रामे ग्रामे भ्रमन् तस्य विचारस्य प्रसारं प्रचारञ्च कृतवन्तः।

सप्तचत्वारिंशतधिकिकैकोनविंशतिशततमे (1947) खीस्ताब्दे भारतस्य स्वतंत्रतायाः समये यदा नौवाखलीस्थाने भीषणोपद्रवः अभवत् तदा गहिरागुरुः गान्धिमहोदयेन सह जनान् शांतिव्यवस्थायै न्यवेदयत्। समाजसेवायां तस्य उल्लेखनीययोगदानं नूनं पुरस्करणीयम्।

षडशीत्यधिकसप्ताशीत्यधि कैकोनविंशतिशततमे (1986–87) खीस्ताब्दे सः'इन्दिरागाँधीराष्ट्रियसमाजसेवा' इति पुरस्कारेण सम्मानितः जातः। नवम्बरमासे एकविंशत्यां दिनाङ्के षण्णवत्याधिकैकोनविंशतिशततमे (21नवंबर,1996) खीस्ताब्दे गहिरागुरोः देहावसानभवत्। मरणोपरान्ते गुरुमहोदयः मध्यप्रदेशशासनेन 'बिरसामुण्डाआदिवासीसेवा' इत्यनेन पुरस्कारेण सम्मानितः जातः। तत्पश्चात् शहीदवीरनारायणसिंहपुरस्कारं च लब्धवान्। तस्य स्मृतौ छत्तीसगढशासनेन गहिरागुरुपर्यावरणं पुरस्कारं उद्घोषितम्।

तथ्यमिदमस्ति यत् जनानां प्रेम स्नेहं च गहिरागुरवे वास्तविकः पुरस्कारः वर्तते। अद्यापि जनाः तम् आदरपूर्वकं स्मरन्ति।

## शब्दार्थाः

| | | |
|---|---|---|
| एकोनविंशतिः | = | उन्नीस |
| मण्डलान्तर्गते | = | जिला में |
| दुरवस्थाम् | = | खराब स्थिति को |
| विलोक्य | = | देखकर |
| परिभ्रमति स्म | = | घूमते थे |
| अहर्निशम् | = | दिन–रात |
| अवबोधयत् | = | समझाया, बताया |
| षण्णवतिः | = | छियान्बे |

## अभ्यासः

**1. संस्कृतभाषया उत्तरं लिखत –**

(क) गहिरागुरोः जन्म कदा अभवत्?

(ख) गहिरागुरुः कस्य स्थापनामकरोत्?

(ग) केषां दुरवस्थां विलोक्य गुरुः दुःखी आसीत्?

(घ) गुरुः जनान् कस्य महत्त्वं अबोधयत्?

(ङ.) छत्तीसगढशासनेन गुरोः स्मृतौ किम् उद्‌घोषितम् ?

**2 रिक्तस्थानानि पूरयत –**

(क) तस्य मातुर्नाम .................... आसीत्।

(ख) सः .................... नेतृत्वम् अकरोत्।

(ग) गुरुः ........................ अनवरतं संलग्नः जातः।

(घ) तेन ................... संस्थापितानि।

(ङ.) अद्यापि जनाः तम् ................... स्मरन्ति।

**3. अधोलिखितानां पदानां पर्यायपदं पाठात् चित्वा लिखत –**

(क) आचार्यः – ............................

(ख) अम्बा – ............................

(ग) गणः – ............................

(घ) पारितोषिकः – ............................

(ङ) अवदानम् – ............................

**4. उदाहरणमनुसृत्य वाक्यानि रचयत –**

यथा– अहं लोककल्याणार्थं कार्यं कर्त्तुम् इच्छामि।

क) ........................................ शृणोमि।

ख) ........................................ नमामि।

ग) ........................................ आप्नोमि।

घ) ........................................ गृह्णामि।

ङ.) ........................................ यामि।

**5. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत –**

क) किशोरावस्थायां रामेश्वरकँवरः गंभीरप्रवृत्तिं प्राप्तवान्।

ख) जीवने शिक्षायाः महत्त्वं निर्विवादम्।

ग) गहिरागुरुः गान्धिमहोदयेन सह जनान् शांतिव्यवस्थायै न्यवेदयत्।

घ) सः जनजातीयसमूहस्य नेतृत्वम् अकरोत्।

ड.) अद्यापि जनाः तम् आदरपूर्वकं स्मरन्ति।

**6. पाठस्य सारांशं पञ्चवाक्यैः लिखत।**

## शिक्षक संदर्शिका

शिक्षक छात्रों को छत्तीसगढ़ की अन्य विभूतियों के जीवन से परिचित कराएँ।

QR25GL